**(अभ्यास पत्रं)**

**केन्द्रीय विद्यालय सङ्गठन, मुम्बई सम्भाग**

**अर्धवार्षिक परीक्षा (2025-26)**

**विषयः - संस्कृतम् (119)** **पूर्णाङ्काः - 60**

**कक्षा - सप्तमी** **अवधिः - 2:30 होरा**

**विद्यार्थी नाम** ________________________________________

**अनुक्रमाङ्कः** __________________ **अनुभागः** ______________________

**निरीक्षकस्य हस्ताक्षरम्** _________________ **परीक्षकस्य हस्ताक्षरम्** _________________

| | |
|---|---|
| **खण्डः क अपठित-अवबोधनम् - अङ्काः-08** | **खण्डः ख रचनात्मकं कार्यम् - अङ्काः-15** |
| **खण्डः ग अनुप्रयुक्तव्याकरणम् - अङ्काः-25** | **खण्डः घ पठित-अवबोधनम् - अङ्काः-12** |

## खण्डः क अपठित-अवबोधनम् - अङ्काः-08

**प्र.1] अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।** **8**

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः । सहसा करुणं ध्वनिं श्रुत्वा सः इतःस्ततः अपश्यत् । बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत् । एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम् । सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के आधारयत् । अत्रान्तरे देवदत्तः तत्र प्राप्तः । सः उच्चैः अवदत् - “सिद्धार्थ! एषः मम हंसः । मया बाणेन निपातितः । अतः मह्यं देहि ।” सिद्धार्थः दृढतया अवदत् - “अहं न दास्यामि । अहम् अस्य रक्षकः अस्मि ।” तौ विवादं कुर्वन्तौ राजसभां गतौ । राजा आदिशति - “यस्य पार्श्वे हंसः आगमिष्यति तस्य भविष्यति ।” हंसः सिद्धार्थस्य समीपं गत्वान् । अतः एव उच्यते - भक्षकात् रक्षकः श्रेयान् ।

**1) एकपदेन उत्तरत** **1*2=2**

क) विवादं कुर्वन्तौ सिद्धार्थः देवदत्तः च कुत्र गतौ ? ..................................................................

ख) कः सिद्धार्थस्य समीपं गतवान् ? ..................................................................

2) **पूर्णवाक्येन उत्तरत** **2*2=4**

क) सिद्धार्थः किं श्रुत्वा इतस्ततः अपश्यत् ?

..................................................................................................................

ख) हंसं दृष्ट्वा सिद्धार्थस्य चित्तं कथं जातम् ?

..................................................................................................................

**3) भाषिककार्यम्** **1∗2=2**

क) 'प्राप्तः' इति क्रियापदस्य कर्तृपदं किम् ?

अ) सिद्धार्थः ब) सः स) देवदत्तः द) हंसः

ख) 'निश्चयेन' इत्यर्थे किं पदं प्रयुक्तम् ?

अ) दृढतया ब) पार्श्वे स) चित्तं द) उच्चैः

## खण्डः ख रचनात्मकं कार्यम् - अङ्काः-15

**प्र.2] मञ्जुषायाः सहायतया चित्रस्य वर्णनं कुर्वन्तु -** **5**



1) पुस्तकालयः तु ________________ एव ।

2) अत्र सर्वे ________________ भूत्वा पुस्तकानि पठन्ति ।

3) ________________ ध्यानमग्नाः सन्ति ।

4) ________________ सञ्चालिका उपविशति ।

5) कोषेषु ________________ पुसकानि दृश्यन्ते ।

**मञ्जुषा** : तूष्णीं , आसन्दे , ज्ञानभाण्डारः , विविधविषयाणां , बालिकाः

**प्र.3] कोष्ठकेषु विद्यामानां शब्दानाम् उचितविभक्तिप्रयोगं कृत्वा वाक्यं पूरयन्तु -** **5**

1) युवकः ________________ (नागार्जुन) रसायनं दत्तवान् ।

2) शिक्षिका ________________ (छात्र) सह सूर्यनमस्कारं करोति ।

3) ________________ (भानु) नमः ।

4) ________________ (खल) विद्या विवादाय ।

5) ________________ (सेवाभावना) विना सः चिकित्सकः न भवेत् ।

**प्र.4] मञ्जुषायाः सहायतया रिक्तस्थानानि पूरयित्वा कथापूर्तिं कुर्वन्तु -** **5**

________________ एकः मृगः एकः काकः च एकत्र निवसतः स्म । तौ ________________ आस्ताम् । एकदा मृगः यदा वने विहरति स्म तदा एकः ________________ तम् अपश्यत् । शृगालः तं ________________ ऐच्छत् । सः मृगेण सह मित्रतां करोति । परन्तु काकः मृगम् उपदिशति यत् अपरिचितेन सह मित्रता न कर्तव्यम् । मृगः काकस्य वचनं न ________________ । सः शृगालस्य कपटकारणात् व्याधेन बद्धः जातः ।

**मञ्जुषा** : शृणोति , शृगालः , प्रियमित्रे , खादितुम् , एकदा

## खण्डः ग अनुप्रयुक्तव्याकरणम् - अङ्काः-25

**प्र.5] प्रदत्तां मञ्जूषां दृष्ट्वा रिक्तस्थानेषु उचितक्रियापदानि लिखन्तु -** **3**

| | | |
|---|---|---|
| जायते | ________________ | ________________ |
| ________________ | जायेथे | ________________ |
| ________________ | ________________ | जायामहे |

**प्र.6] अधः प्रदत्तानां शब्दानाम् रिक्तस्थानेषु रूपाणि लिखन्तु –** **3**

| | | | |
|---|---|---|---|
| आदित्यस्य | ________________ | ________________ | (षष्ठी) |
| शिक्षकेन | ________________ | ________________ | (तृतीया) |
| अहम् | ________________ | ________________ | (प्रथमा) |

**प्र.7] अधः प्रदत्तानां शब्दानाम् उदाहरणानुसारं पदपरिचयं लिखन्तु –** **3**

| | | | |
|---|---|---|---|
| चरणौ = | चरण | प्रथमा | एकवचनम् |
| विज्ञानात् = | विज्ञान | ________________ | एकवचनम् |
| तयोः = | ________________ | षष्ठी | द्विवचनम् |

देवेभ्यः = देव ________________ बहुवचनम्

**प्र.8] अधोलिखितानां शब्दानां पर्यायपदानि लिखन्तु –** **3**

तातः - ................................ सूर्यः - ................................

भटः - ................................ पुरतः - ................................

वपुः - ................................ मनुष्याणाम् - ................................

**प्र.9] अधोदत्तानां शब्दानां वर्णविग्रहं (वर्णवियोगं) कुर्वन्तु -** **3**

1) आर्तनादम् = ..................................................................

2) भारतमातरम् = ..................................................................

3) रसायनशास्त्रे = ..................................................................

**प्र.10] रेखाङ्कितशब्दानां प्रश्ननिर्माणं कृत्वा पूर्णवाक्येन लिखन्तु -** **5**

1) त्रिवर्णध्वजस्य **ऊर्ध्वभागे** अस्ति केशरवर्णः ।

______________________________________________

2) **जन्तवः** प्रियवाक्यप्रदानेन तुष्यन्ति ।

______________________________________________

3) सूर्यनमस्कारेण **आध्यात्मिकं** बलं वर्धते ।

______________________________________________

4) वन्दे **भारतमातरम्** ।

______________________________________________

5) शृगालः लतासु **द्राक्षाफलं** पश्यति ।

______________________________________________

**प्र.11] अधोलिखितानां पदानां स्त्रीलिङ्गरूपाणि लिखन्तु -** **½*5 = 2.5**

एकवचनम् बहुवचनम्

| | | |
|---|---|---|
| पठितवान् | पठितवती | ________________ |
| क्रीडितवान् | ________________ | ________________ |
| खादितवान् | ________________ | ________________ |

**प्र.12] अधोलिखितानां पदानां पुंलिङ्गरूपाणि लिखन्तु -** **½*5 = 2.5**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| पठितवती | पठितवान् | ________________ |
| प्रक्षालितवती | ________________ | ________________ |
| सूचितवती | ________________ | ________________ |

## खण्डः घ पठित-अवबोधनम् - अङ्काः-12

**प्र.13] अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखन्तु -** **4**

तदभ्यन्तरे द्वितीयः युवकः अपि आगतवान्। सः खिन्नः आसीत्। तमपि नागार्जुनः पृष्टवान्। तदा युवकः उक्तवान् “अहम् औषधं निर्मातुं न शक्तवान्” इति। “किमर्थं न शक्तवान्?" इति नागार्जुनः पृच्छति । युवकः उक्तवान् - "राजमार्गे अहं कञ्चित् रोगिणं दृष्टवान् । तस्य परिस्थितिः शोचनीया आसीत् । अहं तं स्वगृहं नीतवान्। दिनद्वयं तस्य एव सेवायां निरतः आसम्। अद्य प्रातः सः स्वस्थः अभवत्। अहं ततः साक्षात् अत्र आगतवान् । रसायननिर्माणार्थं समयम् एव न प्राप्तवान्” इति।

तदनन्तरं नागार्जुनः द्वितीयं युवकं सहायकत्वेन स्वीकृतवान् । राजा एतं वृत्तान्तं श्रुत्वा आश्चर्य प्रकटितवान्। सः नागार्जुनं पृष्टवान् - “प्रथमः युवकः औषधं कृत्वा आनीतवान् । द्वितीयः तथा न कृतवान्। तथापि भवान् किमर्थं द्वितीयं चितवान् ?”

**अ) एकपदेन उत्तरत -** **2**

(क) युवकः रोगिणं कुत्र नीतवान् ? ..........................................................................

(ख) युवकः किं निर्मातुं न शक्तवान् ? ..........................................................................

(ग) राजा किं श्रुत्वा आश्चर्यं प्रकटितवान् ? ..........................................................................

(घ) नागार्जुनः द्वितीयं केन रुपेण स्वीकृतवान् ? ..........................................................................

**आ) एकवाक्येन उत्तरत -** **2**

(क) रोगी कदा स्वस्थः अभवत् ?

.......................................................................................................................................

(ख) राजा नागार्जुनं किं पृष्टवान् ?

.......................................................................................................................................

**प्र.14] अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखन्तु - 4**

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।

वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।

ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥

**अ) एकपदेन उत्तरत - 2**

(क) भारतदेशः कस्य उत्तरे अस्ति ? ...............................................................................

(ख) वर्षस्य नाम किम् ? ...............................................................................

(ग) मनुष्यरूपी-मृगाः कुत्र भारभूताः? ...............................................................................

(घ) कस्याः दक्षिणदिशि भारतदेशः अस्ति ? ...............................................................................

**आ) एकवाक्येन उत्तरत - 2**

(क) भारतवर्षः कुत्र अस्ति ?

.......................................................................................................................................

(ख) के मनुष्यरूपेण मृगाः सन्ति ?

.......................................................................................................................................

**प्र.15] अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखन्तु - 4**

होलिका - भ्रातः! अलं चिन्तया, ब्रह्मणः वरप्रसादात् अग्निः मां न दहति,

अहं ज्वालयिष्यामि प्रह्लादम् । आश्वस्तो भव।

*(होलिका प्रह्लादकक्षं प्रविशति)*

प्रह्लादः - (होलिका दृष्ट्वा) पितृष्वसः ! (आलिङ्गति)

होलिका - अयि भोः प्रह्लाद! आगच्छ, आवां क्रीडिष्यावः।

प्रह्लादः - (सहर्षम्) बाढम्।

होलिका - प्रथमं त्वं माम् अन्विष्यसि।

प्रह्लादः - (सहर्षम्) साधु।

*(होलिका प्रह्लादस्य नेत्रयोः पट्टिकां बध्नाति। किञ्चित् दूरे अग्निः प्रज्वालयति।*

*स्वयम् अग्नौ उपविश्य करतलध्वनिना आह्वयति)*

होलिका - अत्र, अहम् अत्र अस्मि, इत इतः।

प्रह्लादः - अहो तापम् अनुभवामि खलु अहम् ।

(प्रह्लादः अग्निकुण्डस्य समीपम् गच्छति । होलिका तम् अङ्के स्वीकरोति ।)

**अ) एकपदेन उत्तरत -** **2**

(क) प्रह्लादः किम् अनुभवति? ..........................................................................

(ख) प्रह्लादः होलिकां कथं सम्बोधयति ? ..........................................................................

(ग) होलिका कुत्र प्रविशति ? ..........................................................................

(घ) कस्य वरदानात् अग्निः होलिकां न दहति ? ..........................................................................

**आ) एकवाक्येन उत्तरत -** **2**

(क) प्रह्लादः यदा अग्निकुण्डस्य समीपं गच्छति तदा होलिका किं करोति ?

..........................................................................................................................................

(ख) होलिका प्रह्लादं कथम् आह्वयति ?

..........................................................................................................................................

*****समाप्तम्*****